# Sutaproktam Shivavishvadhikyapramanam Tatha Shivadveshaprakaravarnanam

# સૂતપ્રોક્તં શિવવિશ્વાધિક્યપ્રમાણં તથા શિવદ્વેષપ્રકારવર્ણનમ્

## Document Information

Text title : Sutaproktam Shivavishvadhikyapramanam Tatha Shivadveshaprakaravarnanam

File name : shivadveShaprakAravarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 37-84||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 28, 2024

*sanskritdocuments.org*

Sutaproktam Shivavishvadhikyapramanam Tatha Shivadveshaprakaravarnanam

# સૂતપ્રોક્તં શિવવિશ્વાધિક્યપ્રમાણં તથા શિવદ્વેષપ્રકારવર્ણનમ્

સૂતઃ
શિવં વિશ્વાધિકં સામ્બમનન્યસદૃશં પ્રભુમ્ ।
યોઽન્યથા મનુતે મોહાત્સ ભવેત્પુલ્કસાધમઃ ॥ ૩૭॥

શિવદ્વેષોઽપિ વિવિધઃ સ મયાત્ર નિરૂપ્યતે ।
શ્રોતવ્યં સાવધાનેન શુદ્ધનિશ્ચલચેતસા ॥ ૩૮॥

વિષ્ણ્વાદિદેવતાસામ્યં યો વદેદીશ્વરે શિવે ।
સ દુર્ભગઃ શિવદ્વેષ્ટા દ્વેષસ્તત્સામ્યધીઃ શિવે ॥ ૩૯॥

શિવેન દેવદેવેન સદૃશો નાસ્તિ સર્વથા ।
તસ્માદ્વિશ્વાધિકત્વેન શિવઃ સર્વશ્રુતિશ્રુતઃ ॥ ૪૦॥

યતઃ શ્રુતૌ શિવાન્યસ્ય વિષ્ણોરારાધનં દ્વિજાઃ ।
વિશ્વાધિકત્વં નૈવોક્તં સ્તોત્રાર્થમપિ સર્વથા ॥ ૪૧॥

અતો વિશ્વાધિકો રુદ્રઃ કથં વિષ્ણુસમો ભવેત્ ।
રુદ્રો વિશ્વાધિકઃ શ્રેષ્ઠો દેવોત્તમ ઇતિ શ્રુતેઃ ॥ ૪૨॥

વિપ્રા વિશ્વાધિકો રુદ્રો યદિ વિષ્ણુસમસ્તદા ।
શ્રુતિર્વિશ્વાધિકો રુદ્રો હ્યન્યેષાં બાધિતા ભવેત્ ॥ ૪૩॥

વિષ્ણોર્વિશ્વાધિકઃ સોમો જનિતેતિ શ્રુતિર્યતઃ ।
તતો વિષ્ણુર્ન સોમેન જનકેન સમો ધ્રુવમ્ ॥ ૪૪॥

પવનાદિભિરપ્યેનં ન સોમઃ સોમ ઉચ્યતે ।
સોમોઽયં પવનાદીનાં જનિતેતિ શ્રુતિર્યતઃ ॥ ૪૫॥

શિવં વિશ્વાધિકત્વેન શ્રુતિશ્રુતમનામયમ્ ।
યો વિષ્ણુસામ્યતાં બ્રૂયાત્સ દેવેભ્યો બહિષ્કૃતઃ ॥ ૪૬॥

વિશ્વાધિકઃ શિવો નેતિ યો વદેન્મોહતોઽપિ વા ।
સ નૂનં કર્મચણ્ડાલો રૌરવાય પ્રકલ્પતે ॥ ૪૭॥

વિશ્વાધિકે મહારુદ્રે યો વિષ્ણુસમતાં વદેત્ ।
સ નૂનં કર્મચણ્ડાલો રૌરવાય પ્રકલ્પતે ॥ ૪૮॥

વિશ્વાધિકં મહારુદ્રં યોઽન્યથા વર્ણયેદ્ભ્રમાત્ ।
સ નૂનં કર્મચણ્ડાલઃ કુમ્ભીપાકાય કલ્પતે ॥ ૪૯॥

ચક્રાઙ્કગ્રાવસામ્યેન શિવલિઙ્ગસ્ય પૂજનમ્ ।
શિવદ્વેષઃ સુતદ્વેષઃ સર્વથા નિરયપ્રદઃ ॥ ૫૦॥

શિવલિઙ્ગં શિવાકારં ચક્રાઙ્કપ્રસ્તરૈઃ સહ ।
તં નિવેશ્ય મહાપાપૈઃ સંયુતો ભવતિ ધ્રુવમ્ ॥ ૫૧॥

અત્યુત્તમસ્થાનસંસ્થં શિવલિઙ્ગં શિવાત્મકમ્ ।
પૂજનીયં પ્રયત્નેન ત્યક્ત્વાન્યારાધનં દ્વિજાઃ ॥ ૫૨॥

પતિવ્રતા યથા ભક્તયા પતિમાત્રપરાયણા ।
તથા દ્વિજૈઃ શિવો ધ્યેયઃ શિવઃ પૂજ્યો ન સંશયઃ ॥ ૫૩॥

મહેશ્વરાતિરિક્તં યો ભ્રમેણારાધયેદપિ ।
સ ચણ્ડાલ ઇતિ જ્ઞેયઃ સત્યં સત્યં ન સંશયઃ ॥ ૫૪॥

વિભૂતિધારણં ત્યક્ત્વા યઃ શિવં પૂજયિષ્યતે ।
સ દુર્ભગઃ શિવદ્વેષ્ટા સ દ્વેષો નરકપ્રદઃ ॥ ૫૫॥

સર્વકર્મબહિર્ભૂતો ભસ્મધારણવર્જિતઃ ।
ભસ્મના રહિતં કર્મ વૃથા ભવતિ સર્વથા ॥ ૫૬॥

વિભૂતિધારણં ત્યક્ત્વા કુર્વન્હેમતુલામપિ ।
તત્ફલં ન સમાપ્નોતિ પતિતોઽપિ ભવિષ્યતિ ॥ ૫૭॥

સન્ધ્યાશિવાર્ચનાદીનિ કર્માણ્યેતાનિ વસ્તુતઃ ।
વૈદિકાનિ તતસ્તેષુ કર્તવ્યં ભસ્મધારણમ્ ॥ ૫૮॥

યથોપવીતરહિતૈઃ સન્ધ્યા ન ક્રિયતે દ્વિજૈઃ ॥

તથા સન્ધ્યા (પૂજા) ન કર્તવ્યા વિભૂતિરહિતૈરપિ ॥ ૫૯॥

ગતોપવીતૈઃ સન્ધ્યાયાં કાર્યઃ પ્રતિનિધિઃ ક્વચિત્ ।

વિભૂતિધારણેઽપ્ય(ત્વ)ન્યો નાસ્તિ પ્રતિનિધિર્ધ્રુવમ્ ॥ ૬૦॥

વિભૂતિધારણાભાવે સન્ધ્યાત્યાગોઽપિ વસ્તુતઃ ।
દ્વિજો ન પ્રચ્યવત્યેવ નાધિકારી યતસ્તદા ॥ ૬૧॥

વિભૂતિધારણાભાવે યદિ સન્ધ્યાં કરોતિ સઃ ।
પ્રત્યવૈત્યેવ યેનાસૌ નાધિકારી તદા દ્વિજઃ ॥ ૬૨॥

યથાઽધીતાંસ્ત્યજન્ વેદાન્પ્રત્યવૈતિ દ્વિજોત્તમઃ ।
પ્રત્યવૈતિ ન સન્દેહઃ સન્ધ્યાકૃદ્ભસ્મવર્જિતઃ ॥ ૬૩॥

સન્ધ્યાયાં નાધિકારોઽસ્તિ મૂર્છિતાનાં યથા તથા ।
વિભૂતિરહિતાનાં ચ સન્ધ્યાયાં નાધિકારિતા ॥ ૬૪॥

સમ્પાદનીયં યત્નેન શ્રૌતભસ્મ સદા દ્વિજૈઃ ।
સ્માર્તં વા તદભાવે તુ લૌકિકં વા સમાહિતૈઃ ॥ ૬૫॥

યાદૃશં તાદૃશં વાસ્તુ પવિત્રં ભસ્મ સમ્મતમ્ ।
ધારણીયં પ્રયત્નેન દ્વિજૈઃ સન્ધ્યાદિકર્મસુ ॥ ૬૬॥

ન સંવિશન્તિ પાપાનિ ભસ્મલિપ્તં નરં સદા ।
કર્તવ્યમતિયત્નેન બ્રાહ્મણૈર્ભસ્મધારણમ્ ॥ ૬૭॥

યત્કૃતં ભસ્મલિપ્તેન શ્રીમહાદેવપૂજનમ્ ।
તત્સર્વાભીદં તસ્માત્કર્તવ્યં ભસ્મધારણમ્ ॥ ૬૮॥

શિવસ્યાર્ધનમસ્કારઃ શિવદ્વેષ ઇતિ શ્રુતઃ ।
સ પુણ્યનાશકસ્તસ્માત્તત્કર્તા પાપકૃદ્ભવેત્ ॥ ૬૯॥

સાષ્ટાઙ્ગં દણ્ડવદ્ભૂમૌ પ્રણામો ભક્તિપૂર્વકમ્ ।
નિરન્તરં દ્વિજૈઃ કાર્યઃ શામ્ભવેભ્યસ્તથૈવ હિ ॥ ૭૦॥

શિવસ્યાર્ધનમસ્કારો મહાદોષાવહો ભુવિ ।
સ પુણ્યનાશકસ્તસ્માત્તત્કર્તા પાપકૃદ્ભવેત્ ॥ ૭૧॥

સાષ્ટાઙ્ગં દણ્ડવદ્ભૂમૌ પ્રણામો ભક્તિપૂર્વકઃ ।
કર્તવ્યઃ શ્રીમહેશાય દેવાધીશાય સર્વદા ॥ ૭૨॥

મહેશ્વરજનદ્વેષઃ શિવદ્વેષ ઇતિ શ્રુતઃ ।
સ પુણ્યનાશકસ્તસ્માત્તત્કર્તા પાપકૃદ્ભવેત્ ॥ ૭૩॥

સ દ્વેષઃ પાપફલદઃ પાપકર્મપ્રવર્ધકઃ ।
શિવભક્તાઃ પૂજનીયા સ્વશક્ત્યા સાધુસમ્મતાઃ ॥ ૭૪॥

હેમરૌપ્યાન્નવસ્ત્રાદ્યૈઃ પ્રીણનીયાઃ પ્રયત્નતઃ ।
શામ્ભવાન્મધુરાલાપૈઃ પ્રણામાદ્યૈશ્ચ સન્તતમ્ ॥ ૭૫॥

યઃ પ્રણીયેત્સ ગૌરીશં પ્રીણયત્યેવ વસ્તુતઃ ।
યા કૃતા શામ્ભવે પૂજા સા શમ્ભોરેવ વસ્તુતઃ ॥ ૭૬॥

સાક્ષાદભ્યર્ચિતઃ શમ્ભુઃ શામ્ભવસ્યૈવ પૂજયા ।
યતઃ શમ્ભોઃ પ્રિયતમાઃ શામ્ભવા ભસ્મભૂષણાઃ ॥ ૭૭॥

તતઃ કર્તવ્યમનિશં શામ્ભવાભ્યર્ચનં મુદા ।
સદાશિવકથાભિન્નકથાશ્રવણવાચને ॥ ૭૮॥

શિવદ્વેષો દુરન્તોઽસાવઘોરનરકપ્રદઃ ।
શ્રોતવ્યાઃ સર્વદાઽનેન સદાશિવકથાઃ શુભાઃ ॥ ૭૯॥

તતસ્તા મોક્ષદાઃ શ્રૌતાઃ સર્વપાતકનાશકાઃ ।
કીર્તનીયો મહાદેવો જિહ્વયા પુણ્યપૂતયા ॥ ૮૦॥

મહેશકીર્તનં યસ્માન્મહાપાતકનાશકમ્ ।
ભુક્તિમુક્તિપ્રદં પુણ્યં શિવશ્રવણકીર્તનમ્ ॥ ૮૧॥

તતસ્તૈર્યત્નતઃ કાર્યં બ્રાહ્મણાદ્યૈર્મુમુક્ષુભિઃ ।
શિવેતરસુરધ્યાનં શિવદ્વેષ ઇતિ શ્રુતિઃ ॥ ૮૨॥

સ દ્વેષઃ સર્વપુણ્યાન્નિ વિનાશયતિ સર્વથા ।
એતત્પ્રભૃતયો દ્વેષા બહવઃ પાપહેતવઃ ॥ ૮૩॥

તસ્માદેતાદૃશૈઃ પાપૈઃ પચ્યન્તે નરકે જનાઃ ।
તસ્માદેતાદૃશૈર્દોષૈર્વિમુક્તા યે ભવાદૃશાઃ ॥ ૮૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સૂતપ્રોક્તં શિવવિશ્વાધિક્યપ્રમાણં તથા શિવદ્વેષપ્રકારવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૩૭-૮૪॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 37-84 ..

Notes:

Sūta સૂત elucidates the Supremacy of Śiva શિવ and enumerates the types of Śivadveṣa શિવદ્વેષ.

Encoded and proofread by Ruma Dewan

---

*Sutaproktam Shivavishvadhikyapramanam Tatha Shivadveshaprakaravarnanam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*